**संस्कृतवार्ताः**

**दिनाङ्क :-06.12.2024** **प्रातः - 06:55**

## अथ वार्ताः

### पीएम- अष्टलक्ष्मी

प्रधानमंत्री नरेन्द्र मोदी अद्य नव दिल्ल्याः भारत मंडपम् इत्यत्र अष्टलक्ष्मी महोत्सवस्य उद्घाटनं करिष्यति। त्रिदिवसात्मके महोत्सवे पूर्वोत्तरस्य अष्ट राज्यानां संस्कृतिः, जीवन्तं वस्त्र-उद्योगं, शिल्पं, पर्यटन-अवसराः, अद्वितीय-उत्पादाः च प्रदर्शिताः भविष्यन्ति । अयं उत्सवः पूर्वोत्तरस्य अष्टराज्येशु , अरुणाचलप्रदेशे, असम राज्ये, मणिपुरे, मेघालये, मिजोरमे, नागालैण्ड् राज्ये, सिक्किमे, त्रिपुरायां च सामूहिकरूपेण अष्टलक्ष्मी इति नाम्ना प्रसिद्ध: अस्ति ।

### प्रधानमन्त्री भूटान

भूटानस्य राजा जिग्मे खेसर नामग्येल् वाङ्गचुक्: राज्ञी जेत्सुन् पेमा वाङ्गचुक: च ह्यः नवदिल्ल्यां प्रधानमन्त्रिणा नरेन्द्रमोदिना सह मिलितवन्तौ। समागमे श्रीमोदीना भूटानस्य प्रगतेः क्षेत्रीयविकासस्य च जिग्मेखेसरनामग्येल् वाङ्गचुक् इत्यस्य दृष्टिः प्रशंसिता।

### फ्रांस्-सर्वकारः

अविश्वास-प्रस्तावे पराजयानन्तंर फ्रांस्-सर्वकारः निरस्तः सञ्जातः, येन यूरो-क्षेत्रस्य द्वितीया बृहत्तमार्थव्यवस्था राजनीतिक-संकटापन्ना सञ्जाता। प्रधानमन्त्रिणः मिशेल-बार्नियरस्य सर्वकारम् अपदस्थं कर्तुं वामपंथि-दक्षिणपंथि-दलयोः सांसदाः परस्परं सम्मिलिताः सन्ति । अनेन सह एव मिशेल-बार्नियरः षट्-दशकेषु संसदः अपदस्थभूतः प्रथमः प्रधानमंत्री अभवत्। वामपंथि-दक्षिणपंथि-दलयोः एकत्रिंशदुत्तर-त्रिशतं सांसदैः देशस्य निम्नसदने अविश्वास-प्रस्तावस्य समर्थनं कृतं यः, आवश्यकमतै: अपि अधिकम् अस्ति।

### महाराष्ट्र-देवेन्द्रः

भाजपा इति दलस्य वरिष्ठ नेता देवेन्द्र फडनवीस: गत सायं तृतीयवारं महाराष्ट्रस्य मुख्यमन्त्रित्वेन शपथग्रहणं स्वीकृतवान्। भाजपा दलस्य नेतृत्वे महायुति ग्रन्थिबन्धनेन महाराष्ट्रस्य विधानसभा निर्वाचने त्रिंशदुत्तर द्विशतं निर्वाचनासनानि विजितानि आसन्। भाजपा दलेन सह शिवसेना, राष्ट्रवादीकांग्रेस दलं च महायुतौ सम्मिलिता: सन्ति। शपथग्रहण समारोहे प्रधानमन्त्री नरेन्द्रमोदी, वरिष्ठ केन्द्रीय मन्त्रिणा:, मुख्यमन्त्रिणा:, अन्ये च गणमान्या: उपस्थिता: आसन्।

### इसरो-पीएसएलवी सी-59 प्रक्षेपणम्

भारतीय-अंतरिक्ष-अनुसंधान-संगठनं (इसरो) इत्यनेन गत सायं श्रीहरिकोटायाः सतीश-धवन-अंतरिक्ष-केंद्रे पीएसएलवी सी-59 इति प्रक्षेपण-यानस्य सफलतापूर्वकं प्रक्षेपणं कृतमस्ति। अनेन प्रक्षेपणयानेन श्रीहरिकोटायां स्पेसपोर्ट इत्यत्र प्रक्षेपणस्थलात् सायं चतुरधिक-चतुर्वादने उड्डयनं समारभत्। प्रक्षेपणस्य अनन्तरं, इसरो इत्यनेन एक्स्-इति सार्वजनिक-संदेशपटले प्रोक्तं यत्, पीएसएलवी-सी59 इत्यनेन सफलतापूर्वकं आकाशे प्रयाणं कृतमस्ति, येन इसरो इत्यस्य तान्त्रिक्या विशेषज्ञतया सह यूरोपीय-अंतरिक्ष-संगठनस्य प्रोबा-3 उपग्रहाणां स्थापनाय न्यूस्पेस-इंडिया-लिमिटेड इत्यस्य नेतृत्वे एकस्य वैश्विकाभियानस्य समारम्भम् अभवत्। अवधेयं यत् प्रोबा 3 यूरोपीय-अंतरिक्ष-संगठनस्य प्रदर्शनाभियानम् अस्ति। अस्मिन् अभियाने द्वयंतरिक्षयाने सम्मिलिते स्तः , ये युगपदेव कक्षायां संस्थापयिष्येते।

### क्रिकेट् निकष

पुरुषक्रिकेट्-क्रीडायां भारत-ऑस्ट्रेलिया-दलयोः मध्ये बोर्डर-गावास्कर-ट्रॉफीति-क्रीडायाः द्वितीया निकष- स्पर्धा अद्य प्रातः एडिलेड्-ओवल-इत्यत्र आरभ्यते। भारतीयमानकसमयानुसारि प्रातः सार्ध नववादने क्रीडायाः आरम्भः निर्धारितः अस्ति ।

## इति वार्ताः